M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref, / Ser. 1569

Title : Vyakaran Bhushan

1569

InComplete

C

	Vyakaran	Bhushan	Title
			Author
			Editor
			Year, Vols.
S/c			Publisher
1569.		Pages 66 to 78 - Moth-eaten	Remarks

तन्निष्पद्यते इति वाक्यपदीये अत एव यत्नादयो व्यापारो धातुनाभिधीयते तदाश्रयः कर्तेति स्थालीपच
ति अग्निः पचति तंडुलः पच्यते स्वयमेवेत्यादि संगच्छते नन्वेवं कर्मकर्तृदेशाच्चेति सूत्रे मनोमयः प्राण
शरीर इति वाक्यस्य मनोमयत्वस्य जीवत्वे वाक्यशेषे तस्य एतमितः प्रेत्याभिसंभवितास्मीति प्रा
प्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं संगच्छतां उच्यते जीवस्यैवत्येयत्वे
प्राप्तिकर्मत्वमपि वाच्यं कर्तृत्वं च तस्याख्यातेनोक्तं न चैकस्यैकदा संज्ञाद्वयं युक्तं कर्तृसंज्ञया कर्म
संज्ञाया बाधात् तथा चैतमिति द्वितीया न स्यात् कर्तृकर्मतायां च युगपद्धापत्तिरिति शाब्दविरो
धद्वारा सा भवति सं[illegible] हेतुः एवं च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः कारके चेत्के
प्रयोज्यत्वं तत्साश्रयत्वं वा द्वि- करोतीत्यत्र व्याप्तं अयं च त्रिविधः शुद्धः प्रयोजको हेतुः कर्मकर्ता च म
याहरिः सेव्यते कार्यते हरिणा गमयति कृष्णं गोकुलं मदभिन्नाश्रयक[illegible] हरिकर्मकसेवानुकूलो व्यापा
रः हर्यभिन्नाश्रयक उत्साहनानुकूलो व्यापारः गोकुलकर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापा
रानुकूलो व्यापार इति शाब्दबोधः करणतृतीयायास्त्वाश्रयव्यापारो वाच्यो तथाहि साधकतमं करणं
तमबर्थः प्रकर्षः स्वाव्यवधानेन फलजनकव्यापारवत्ता तादृशव्यापारवत्कारणं करणं उक्तं चैतद्वाक्यप
दीये क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतं वस्तुतस्तदनि
र्देश्यं नहि वस्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति विवक्ष्यते इत्यनेन
सेकुदनेकेषां तदभावात् द्वितीया[illegible]स्थाल्यादेरवकाशः सूचयति न चैवं कर्ता शास्त्रार्थत्वादि
स

सुतरमीमांसाधिकरणे शक्तिविपर्ययादिति सूत्रेणांतःकरणस्य कर्तृत्वे करणशक्तिविपर्ययाप
भू.६ निरुक्ता न युज्येतेति वाच्यं तदेतेषां प्राणानां विज्ञानेन विज्ञानमादायेति श्रूयते रे करणत्वस्याकु
प्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्ति निष्प्रमाणा प्रकल्प्येते साभिप्रायात् वस्तुतस्त्वनर्थ
मात्रमेतदिति यथा च तद्दोषस्तथैव साधिकरणे भाष्य एव स्पष्टं इत्यादि प्रपंचितं भूषणे सप्तम्या अयमत्र
योर्थः सप्तम्यधिकरणे चेत्यधिकरणे सप्तमी तच्च आधारोधिकरणमिति सूत्रादाधारः तच्चाश्रयत्वं त
त्राश्रयांशः शक्यः तत्तमवच्छेदकं न चाश्रयत्वमात्रेण कर्मकर्तृकरणानामाधारसंज्ञा स्यात् इष्टापत्तेर्वय
दिताभिरस्यानबाधः स्यात् कारके इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय एव यद्यपि तास्यं तथाप्य
त्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादौ तलकटादिश्चेति स्थाल्यां पचति भूतले वसति कटे
शेत इत्याद्युपपद्यते उक्तं च वाक्यपदीये कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां उपकुर्वत्क्रियासि
द्धौ शास्त्रेऽधिकरणं स्मृतं एतच्च त्रिविधं औपश्लेषिकं वैषयिकमभिव्यापकं च कटे शेते गुरौ वसति मो
क्षे इच्छास्ति तिलेषु तैलमिति एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं अवधिः पंचम्यर्थः अपादाने
पंचमी तच्च ध्रुवमपायेपादानमिति सूत्रादपायो विश्लेषस्तज्जनिका क्रिया तत्रावधिभूतमपा
दानमित्यर्थकादवधिभूतमिति भावः उक्तं च वाक्यपदीये अपाये यदुदासीनं चलं वा यदि वाचलं
ध्रुवमेव तदावेशात्तदपादानमुच्यते पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ तस्याप्यश्वस्य
पतने कुड्यादि ध्रुवमुच्यते उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके विभागे प्रविभक्ते तु क्रि
येतरव्यवस्थिते मेषांतरक्रियापेक्षमवधित्वं पृथक् पृथक् मेषयोः स्वक्रियापेक्षं कर्तृत्वं च

(विश्लेष्टं इति भेगेवतोयोसौ नेतौ)॥ पृथक् पृथक् इत्यस्यार्थः अपायो विश्लेषहेतुक्रियायां उदासीनमनाश्रयः अन
× प्रावेशात् तत्क्रियानाश्रयत्वात् एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितं इत्यात्पर्णपततीत्य ×
तिनेष्यते इति वाक्यपदीयात् अत एव ... तद्धके सौतिरव्याली ×
पचति अग्निः पचति तंडुलः पच्यते स्वयमेवेत्यादि ... कर्मकर्तृव्यपदेशाद्धिति सूत्रे मनोमि
यः प्राणशरीर इति वाक्यस्य मनोमयस्य जीवत्वे वाक्यशेषे तस्य एतस्मिन्नितः प्रेत्याभिसंभवितास्मीति
प्राप्तिकर्मत्वकर्तृत्वव्यपदेशाभ्यां ...तीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेपि तत्त्व विरुद्धमित्याह यस्मा
दश्वादिति तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयं तथा च पुरुषपतनहेतुक्रियानाश्रयत्वं
न विरुद्धमिति भावः एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह तस्यापीति उभयकर्म
ज विभागस्थले विभागस्यैक्यात् तद्विश्लेषजनकक्रियानाश्रयत्वाभावात् परस्परान्मेषावपसरत इति न
स्यात् इत्याशंक्य समाधत्ते उभावपीति मेषांतर इति यथा निश्चलमेषादपसरति द्वितीयमेषे ...लेनि
श्चलमेषस्यापसरणमेषमादाय ध्रुवत्वं तथात्रापि विभागैक्येपि क्रियाभेदादेकक्रियामादायाप
रस्य ध्रुवत्वमिति तथा च विश्लेषाश्रयत्वे सति तज्जनकक्रियानाश्रयत्वं तत्क्रियायामपादान
त्वं वाच्यं क्रिया चात्र धात्वर्थो न तु स्पंदः तेन वृक्षस्य भंगजविभागवति वृक्षे वृक्षाद्धस्त्रं पततीति संग
च्छते वस्तुतो नैतावत् पंचम्या वाच्यं किं तु अवधेर्लक्षणमात्रं द्वितीयार्थो ...रीसाप्रयोगे ...तिप्र
संगस्यासंभवेन वाच्यत्वे ... प्रवेशस्य गौरवेणासंभवादिति तु प्रतिभाति न चैवमपि वृक्षात्स्पर्द्ध
त इति स्यादिति शंक्यं आसनाच्चलितः राज्याच्चलित इति वदिष्टत्वात् एतेन पंचमीजन्यापादान
त्वबोधे सकर्मकधातुजन्योपस्थितिहेतुत्वमिति समाधानाभ्यासोप्यपास्तः न चैवमपि वृक्षा
× त्रपर्णस्य तन्निवारणाय सत्संतं धावतोश्वात्पततीत्यत्राश्वस्य क्रियाश्रयता द्विश्लेषहेतुरिति कुड्ये सततोश्वा ×
सत ×

प.७ सजतीतिदुर्वारं कर्मसंज्ञया पादानसंज्ञाया बाधेन पंचम्यसंभवात् अस्मात्कृतैतत्प्रयोगे यद्बोधाभा
वेनुभवसिद्धस्तर्हि पंचमीजन्यापादानत्वबोधे सज्यादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यं बुद्धाद्यर्थकाद्धि
द्योतनद्रुसादो निःसृत्य सेसध्यार्थे रूपं रसात्पृथगित्यत्र बुद्धिपरिकल्पितमपादानं तद्र रूलाक्रम
पृथग्विनेतिपंचमी इदं च निर्दिष्टविषयं किंचिदुपात्तविषयं तथा अपेक्षितक्रियं चेति त्रिधापादान
मुच्यते इति वाक्यपदीयात्रिविधं यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयं यथाश्व
श्वात्पततीति यत्र धात्वन्तरार्थांगं स्वार्थं धातुराह तदुपात्तविषयं यथा बलाहकाद्विद्योतते निःसरणां
गं विद्योतनं ह्युत्तिवर्तते अपेक्षिता क्रिया यत्र तद्यथा कुतो भवान् पाटलिपुत्रात् अत्र आग
मनमर्थं अध्याहृत्यान्वयः कार्यः उद्देश्यश्चतुर्थ्यर्थः तथाहि संप्रदाने चतुर्थी तच्च कर्मणा यमभि
प्रैति स संप्रदानं इति संज्ञा कर्मणाकरणभूतेन यमभिप्रैति ईप्सति तत्कारकं संप्रदानमित्यर्थ
कादुद्देश्यः इदमेव शेषितं तदुद्देश्यकेच्छाविषयत्वं च शेषित्वमित्येव पूर्वतंत्रे निरूपितं अत एव देवता
सनवनैत्रावरुणाय दंडप्रदानमित्यधिकरणे दंडप्रदानमिति विहितं दंडदानं चतुर्थीश्रुत्यर्थं कर्मे
ति तत्रानिर्णीतं रजकायवस्त्रं ददातीत्यभिरवडिकोपाध्यायाः तस्मा शिष्याय चपेटिकां ददातीति
भाष्योदाहरणादि दृष्टमेव वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्व
त्वानिवृत्तिपर्यन्तमर्थं वर्णयंतो रजकस्य वस्त्रमित्याहुः इदं चानिराकरणात् कर्तुरीप्सितानां कर्मणे
प्सितप्रेरणानुमतिभ्यां च लभ्यते संप्रदानता मिति वाक्यपदीयात्रिविधं सूर्यायार्घ्यं ददातीत्यर्घ्य
नीत तत्सूर्येण प्रार्थ्यते नानुमन्यते न निराकरोति प्रेरकं विप्राय गां ददाति अनुमंत उपाध्यायाय गां
ददाति अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः विभक्तीनां धर्मिवाचकत्वात् धर्ममात्रवाचक
र्मि

त्वे कर्मणि द्वितीयेति सूत्रस्वरसभंगापत्तेः कर्मार्थकत्वाद्दिताद्यन्तत्यादर्शनाच्च द्वितीयाद्यर्थके बुद्ध
श्रीहीः प्राप्तादेकरसादेः धर्मिवाचकताऽभावाच्च सुपांकर्मादयोप्यर्थाः संख्या चैव तिङामिति भाष्या
च्चेतिदिक् आश्रयस्यापि प्रकृत्यैव लाभात् न विभक्तिवाच्यता किं त्वाश्रयत्वमात्रं वाच्यं तदेव च तादा
त्म्येनावच्छेदकं करणतृतीयायाश्च व्यापाराऽपि पंचम्या विभागमात्रं चतुर्थ्या उद्देश्यत्वमात्रं अत ए
वाकृत्स्याधिकरणमपि न विरुध्यते इत्यभिप्रेत्याह शक्तिरेकैवेति षण्णामपीति शेषः शेषषष्ठीस
त्रानस्याः संबंधमात्रं वाच्यं कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यं सप्तमीपंचम्यौ कारकमध्ये इति स
त्रे शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात् एवं च देवदत्तस्य गो ब्राह्मणाय गेहादंगायां हस्तेन म
याद्दीयते इत्यत्र देवदत्तसंबंधिनी या गौस्तद्वृत्तिर्भाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठवि
भागजनको गंगाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः यथायथं उक्तप्रकारेणात्र
मानमुपदर्शयन् घटं जानातीत्यादौ द्वितीयाया विषयताया लक्षणेति बद्धाकुलं वदतो नैय्यायिका
दीन्प्रत्याह सुपां कर्मेतीति त्वयं भावः सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां प्रसिद्धो नियमस्त
त्र नियमः प्रकृतेषु वेति वार्तिक तद्व्याख्याभ्यां कर्मादिर्वाच्यता यास्तु नियमस्य च लाभः तथाहि
स्वौजसमौट् कर्मणि द्वितीया द्व्येकयोर्द्विवचनैकवचने इत्यादेः लस्य तिप्तसझि तान्यक्च
नद्विवचनत्यादेरेकवाक्यतया कर्मादेः संख्यायाश्च वाच्यता लभ्यते तथा तन्नियमः श्वेतद्वि
धो लभ्यते द्वितीया कर्मण्येव तृतीया करण एवेत्यप्रमादि रर्थनियमः कर्मणि द्वितीयैव करणे तृतीयैवे
त्येवं शब्दनियमश्च उभयथापि सिद्धं नियम विरुद्धं लक्षणादिकमसाधुत्वप्रापकमिति यात्ते कर्मणि
नान्यत्वमिति निषेधविषयोपसर्गवेति स्वेच्छया लक्षणापि विभक्तावप्रयोगातिके अतएव विषयको

भू.८ नलक्षणेत्यादिनेत्याधिकं द्रूनां व्यवहार इति दिक् ॥ २९ ॥ इति श्रीवैयाकरणभूषणे सारे सुबर्थनिर्णयः
नामार्थानाह एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा नामार्थ इति सर्वेमी पक्षाः शास्त्रे निरूपिताः एकं जा
तिः लाघवेन तस्या एव वाच्यतोचिता न तु अनेकव्यक्तीनां वाचित्वे गौरवात् न च व्यक्तीनामपि प्रत्येकमेकत्वाद्
निगमनाविरहः एवं हि एकस्या एव व्यक्तेः शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वसंसर्गे जा
गौरवं जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवं किंचैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्याया
ज्जातिरेव वाच्येति युक्तं आनि बोधस्तु लक्षणया एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक् यद्वा केवल
व्यक्तिरेवैकः शब्दार्थः केवलव्यक्तिपक्षे [illegible] ग्रहणास्यैकशेषस्य चारितार्थ्यं तस्यापि शास्त्रासिद्धत्वात् युक्तं
चैतत् व्यवहारेण व्यक्तावेव शक्तिग्रहणात् संबंधितावच्छेदकस्य जातेरैक्यात् [illegible] गौरवमपि न चे
वं घटत्वमपि वाच्यं स्यात् शक्यतावच्छेदकत्वात् नागृहीतविशेषणन्यायात् तद्देव वाच्यत्वमस्तीति [illegible] अका
रणत्वेपि कारणतावच्छेदकवत् लक्ष्यतेपि लक्ष्यतावच्छेदकत्ववत् तथात्रापि संभवात् उक्तं च आनन्त्येपि हि भा
वानामेकं कृत्वोपलक्षणं शब्दः सुकरसंबंधो न च व्यभिचरिष्यतीति वस्तुतस्तु न ह्याकृतिपदार्थस्येदं
व्यं न पदार्थ इति भाष्याद्विशिष्टं वाच्यं एकं मिश्रस्य चायमभिप्रायः शक्तिज्ञानत्वेन विषयतावच्छेदिका
जातिरेव तथा च घटत्वविशिष्टबोधे घटत्वांशे अन्याप्रकारक घटत्वे शक्तिज्ञानत्वेन हेतुतेति कार्यकार
णभाव इत्यादि प्रपंचितं भूषणे द्विकमिति जातिर्व्यक्तिरित्यर्थः पूर्वपक्षोद्धं रोध्य(?) प्रत्याहारः पूर्ववत् त्रिकमि
ति जातिव्यक्तिलिंगानीत्यर्थः सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वं आधिक्यं पुंस्त्वं अपचयः
स्त्रीत्वं तत्तद्वृत्तनिष्ठं तद्व्यंग्यं च तमेव विरुद्धधर्ममादाय तटादिशब्दा अभिधीयते केषांचिदनेकलिंगत्व
व्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् एवं च पदार्थपदे पुंस्त्वमेव व्यक्तिपदे स्त्री
त्वमेव तत्पदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थः द्रव्यं व्यक्तिः इदं वस्त्विति व्यवहारतः स्त्रीतटी तटः

तिचोपपद्यते तच्च लिंगमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तं पशुना [illegible] यां नास्तीति पशुनेत्या
दिविधि न कांक्षीनंगत्वेन प्रयोजयतीति विभावनीयं न च पश्वादिशब्दोक्तलिंगस्यैव पश्वादिशब्दोक्त
स्यापि साधारण्यात्कथं व्यक्तिशब्दस्य नित्यस्त्रीलिंगत्वेन तथात्वसंभवेपि पशुशब्दस्य नित्यपुंलिंग
त्वे प्रमाणाभावात् पश्वा न पायुं गुहा चरंतं पश्वेन ध्यायच्या गवे इत्यादिवेददर्शनाच्च मीमांसायां चतु
र्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा यागप्रतिपादितत्वाच्च व
स्तुतस्तु विशेषविध्यभावे उप्रत्ययांतानां पुंस्त्वस्य व्याकरणे निर्णीतत्वात् वेदभाष्येपि जसादिषु छंद
सि वा वचनमिति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात् प्रकृतेपि छागो वा मंत्रवर्णादि
ति न्यायेनैव निर्णयः मंत्रवर्णो हि छागस्य वपाया मेदस इति श्रूयते तत्र छागस्येति पश्वामंत्र संस्था
पितमिति ततः पुंस्त्वनिर्णयः चतुष्कं संख्यासहितं त्रिकमित्यर्थः पंचकं कारकसहितं चतुष्कमि
त्यर्थः ननु अन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यं तत एव लिंगादीनामुपस्थितेः प्रकृतेर्वा
च्यत्वे मानाभाव इति चेत्सत्यं प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोपि बोधात् प्रकृतेरेव वाच
कत्वं कल्प्यते [illegible] लिंगानुशासनस्य प्रकृतेरेव दर्शनाच्चेति अतएव लुप्तप्रत्ययेषु न निर्बोधः प्रत्ययस्ये
व वाचकतायां युक्तत्वात् द्योतिका वा वाचिका स्युर्द्वित्वादीनां विभक्तयः इति वाक्यपदीयेपि पक्षद्वय
स्य व्युत्पादनात् शास्त्रे इति बहुषु स्थलेषु व्युत्पादनं व्यंजयितुं प्राधान्येन स्वरूपसूत्रादौ व्यक्ते [illegible]
शब्दस्तावच्छाब्दबोधे भासते न सा जातिः प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्दे
न भासते इत्याद्यनुभविको न तु विष्णुमुच्चारयेत्यादौ वर्णोच्चारणासंभवे न विना शब्दविषयं शब्द

५५.१ बोधासंगतिश्चेति सोपि प्रातिपदिकार्थः न च लक्षणया निर्वाहः निरूढलक्षणायाः शक्त्यनतिरेकात् जव
गड्डुकश्रुमुच्चारयेत्यादौ शक्त्या ग्रहणशक्यसंबंधरूपलक्षणया अग्रहाच्च अज्ञातायाश्च वृत्तेरनुपयोगात्
गंगामुच्चारयेत्यादिभाषाशब्दानामनुकरणे साधुतासंप्रतिपन्ने तेषां शक्त्यभावेन परेणयो लक्षणायाऽसं
भवाच्चेत्यभिप्रेत्य बोधाय्रिमिचि प्रातिपदिकार्थ इत्याह शब्दोपि यदि भेदेन विवक्षा स्यात्तदा तथा नो चे
च्छ्रोत्रादिभिः सिद्धोप्यसावर्थेवभासते यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोपि प्रातिपदि
कार्थः यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोपि अर्थवद्भासते अपि हेतौ उपस्थितश्चेद्भासे
तेत्यर्थः अयं भावः अनुकार्यानुकरणयोर्भेदे नुकार्यस्य पदादनुपस्थितत्वात् नास्ति द्वयंशे रूपे
या अभेदे प्रसक्तो विषयस्य हेतुत्वात्तत्त्वप्रत्यक्षरूपं पदजन्योपस्थितिमादाय शाब्दबोधविषयतो
पपत्तिरिति यद्यप्यतिप्रसंगवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाप्यत्राश्रयतया वृत्तिमत्त्व
स्य सत्त्वान्नानुपपत्तिः निरूपकताश्रयतान्यतरसंबंधेन वृत्तिमत्त्वं एव शाब्दबोधविषयत्वं व्याप्ते इत्य
नवद्य संबंधस्याप्यनिरूप्यत्वात् सदार्थस्येव तद्बोधकत्वे तस्यापि ज्ञानसंभवाच्चेति उक्तं वाक्यपदीये ग्रा
ह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते इति विषयत्वमनादृत्य शब्दै
नार्थः प्रकाश्यते इति चेति २६ प्रसंगादनुकार्यानुकरणयोरभेदपक्षे साधकमाह अतएव गवित्याह
भसत्यायामितीदृशं न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतं गवित्ययमाह भसत्याया मित्येवमादयोय
तोनुकरणशब्दा अनुकार्यानभिद्यते अतस्तेषामर्थवत्ताभावादर्थवदधातुरिति प्राप्तो न प्राति
न वा प्रातिपदिकत्वं अर्थवत्त्वे तु सम्भवति सुपपद्यते अन्यथा प्रत्ययः परश्च अपदं न प्रयुंजीतेति निषेधात्तिलं
घनादसाधुतापत्तिरित्यर्थः २७ इति श्रीमद्व्याकरणे नामार्थः समाप्तः समासो न विभज्यते सुपां सु
पा तिङा नाम्ना धातुनाथ तिङां तिङा सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः सुपां सुपा पदद्वयम

पि सुबन्तं राजपुरुष इत्यादि सुपां तिङा पूर्वपदं सुबन्तमुत्तरं तिङन्तं पर्यभूषत् अनुव्यचलत् गतिम
तोदात्तवति तिङीति तिङापि समास इति वार्त्तिकात्समासः सुपां नाम्ना कुम्भकार इत्यादि उपपदमतिङिति समा
सः स च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति परिभाषया भवति सुबुत्प
त्तेः प्रागत्रोत्तरपदे सुबुत्पत्तेः प्रागिसेवाधीत् अन्यथा चर्मक्रीतीत्यादौ नलोपो नापत्तेः सुपां धातु
ना उत्तरपदं धातुमात्रं न सुप्तिङन्तं कटप्रूः आयतस्तूः वाचिप्रश्नायतस्तु कटप्रुजश्रीणां क्विब्दीर्घश्चेति
वार्त्तिकात् तिङां तिङापि बृतर इवादतो पचतभृज्जता इत्यादि आख्यातमाख्यातेन क्रियासातत्ये इति मयूरव्यंसका
दिगणसूत्रात् तिङः सुबन्तेन पूर्वपदं तिङन्तमुत्तरं सुबन्तं जहि स्तम्बः जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं
चाभिदधातीति मयूरव्यंसकादिगणसूत्रात् अयं षड्विधोपि समासः सह सुपेति सूत्रे योगविभागेन भाष्य
कृतसादितः स्पष्टः शब्दकौस्तुभादौ २८ स्वयं भाष्यादिसिद्धं तदुद्दृष्य प्राचीनवैय्याकरणोक्तविभा
गस्य अव्याप्त्यतिव्याप्त्यादिभिः सलक्षणस्य प्रायिकत्वं दर्शयति समासस्तु चतुर्धेति प्रायोवादस्तथा परः
योयं पूर्वपदार्थादिप्राधान्यविषयसोपि च भूतपूर्वो सोपि रेवांगवयादिवदास्थितः चतुर्धा अव्ययीभावतत्पुरुषद्व
न्द्वबहुव्रीहिभेदात् अयं प्रायोवादः भूतपूर्वः इभः कारभः आयस्तः बाधोध्वं विवेसाधसंग्रहात्तथा
पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधानो द्वन्द्वः अन्यपदार्थप्रधानो बहु
व्रीहिरित्यादिलक्षणमपि प्रायिकं उन्मत्तगंगं सूपप्रति अर्धपिप्पली द्वित्राः शरादिशपलाश मित्यादेरि
स्यरव्यभिचारादिति भावः तथाहि उन्मत्तगंगमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः अन्यप
दार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च अन्यपदार्थे च संज्ञायामिति समासात् सूपप्रतीत्यव्ययीभा
वे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावे व्याप्तिश्च सूप्रतिना मात्रार्थे इति

भ.२० समासः अर्धपिप्पलीतितत्पुरुषः पूर्वपदार्थप्राधान्यसत्वादव्ययीभावेतिव्याप्तिरुत्तरपुरुषेतिव्याप्तिश्च
अर्धनपुंसकमितिसमासात् एकं पूर्वकायइत्यादेश्चद्रष्टव्यं द्वित्रादितिबहुव्रीहावुभयपदार्थप्राधान्या
त्द्वंद्वेतिव्याप्तिर्बहुव्रीहावव्याप्तिश्च शशकुशमित्यादि द्वंद्वे समाहारान्यपदार्थप्राधान्यात्बहुव्रीहिषु
तिव्याप्तिर्द्वंद्वावाप्तिश्च स्यादितिभावः सिद्धांतेव्ययीभावाधिकारपठितत्वमव्ययीभावलक्षणं
स्यादिद्रष्टव्यं असंभवश्चैषामित्याह भौतपूर्व्यादित्यादि रेखागवयादिनिष्ठ लांगूलादेर्वाश्चपश्च
लक्षणत्ववदेतेषामपिनसमासलक्षणत्वं बोधकत्वात्तु तद्वदेवस्यादितिभावः २८ ननुपूर्वपदार्थप्रा
धान्यादिसमासेस्तुवचं तथाहि समर्थः पदविधिरितिसूत्रे भाष्यकारैरनेकधोक्तेष्वपिप्रधानेन्द्रजह
त्स्वार्थाजहत्स्वार्थपक्षयोरैकार्थीभावव्यपेक्षारूपयोः पर्यवसानं लभ्यते तत्राजहत्स्वार्थ
पक्षे उक्तव्यवस्थानासंभविनीत्याशंकामनसिकृत्याह जहत्स्वार्थाजहत्स्वार्थेद्वेवृत्तीतेपुनस्त्रिधाभेदः
तेः संसर्गउभयंवेतिवाच्यव्यवस्थितिः जहतिपदानिस्वार्थंयस्यां साजहत्स्वार्था पदेवर्णवद्वृत्तौपदानामानर्थक्ये
मित्यर्थः अयंभावः समासशक्त्यैव राजविशिष्टपुरुषभानसंभवेन राजपुरुषपदयोरपिपुनस्तद्बोध
कत्वकल्पनं वृषभयावकादिपदेषु वृषादिपदानामिव अन्यथाराजपदेनविग्रहवाक्यइव राज्ञः स्वोत
रेणोपस्थितिः स्यात् ततश्च राज्ञः पुरुषइत्यत्रेव राज्ञः स्वराजपुरुषइत्यस्यापत्तेरितिअजहदिति
नजहतिपदानिस्वार्थंयस्यां साजहत्स्वार्था अयमभिप्रायः राजपुरुषादिसमासादौनातिरिक्ताश
क्तिः कल्पकाभावात् किंतुराजादिपदादेवार्थोपस्थितिसंभवेतत्कल्पनस्यगौरवपराहतत्वात्तत्र कृ
तशक्तिः सागोप्यप्रामाणिकः कल्प्येत तथाचाकांक्षादिवशात्कृतशक्त्यैवविशिष्टार्थबोधः अ

यमेवव्यपेक्षापक्षोमतांतरत्वेन भाष्यकारैरुक्तः नचात्रमतेसमासे ऋद्धस्येतिविशेषणान्वयापत्तिः स
विशेषणानांवृत्तिर्नेति नस्यवाविशेषणायोगेनेतिवार्तिकात् तथाचैतन्मतवादिनां पूर्वोत्तरपदार्थप्रधानत्वा
दिव्यवस्था स्त्रास्यपदइतिभावः प्रसंगाद्वृत्तिभेदमपिनिरूपयति तेपुनरिति द्वेअपिवृत्ती त्रिविधेवाच्य
त्रैविध्याद्वाच्यमेवाह भेदइत्यादि भेदअन्योन्याभावः तथाचराजपुरुषइत्यादावराजकीयभिन्न
इतिबोधः अस्यावाच्यत्वेचराजपुरुषः सुंदरइतिवद्राजपुरुषोदेवदत्तइत्यत्रैवस्यापिस्यात् वाच्यत्वेतद्विरो
भ.१. धान्नैवंप्रयोगइतिभावः राजसंबंधवान्इत्येवशाब्दज्ञानं भेदस्तूत्तरकालमुपतिष्ठतइत्याशयेनाह
संसर्गइति विनिगमनाविरहादुभयंवाच्यमित्याह उभयंचेति तथाचराजकीयाभिन्नोराजसंबंधवान्श्चा
यमितिबोधः ३० व्यपेक्षावादस्यैवयुक्तिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदार्थप्रधानइत्यादिसर्गो
ऽप्ययुक्तः किंतुरेखागवयन्यायेनोत्सर्गोपिपरंपरयैवबोधकइत्याशयेनसमाधत्ते समासेखलुभि
न्नैवशक्तिः पंकजशब्दवत् बहूनांवृत्तिधर्माणांवचनैरेवसाधने स्यान्महद्गौरवंतस्मादेकार्थीभाव
आश्रितः समासइतिवृत्तिमात्रोपलक्षणं समर्थः पदविधिरित्सत्र पदमुद्दिश्ययोविधीयते समा
सादिः ससमर्थः विग्रहवाक्यार्थाभिधानेशक्तः सन्साधुरितिसूत्रार्थस्यभाष्यादलाभात्पदोद्दे
श्यकविधित्वंचकृत्तद्धितसमासैकशेषसनाद्यंतधातुरूपासुपंचस्वपितिष्ठत्येव शक्तेश्चखीकर्तव्य
त्वं व्यपेक्षावादिनामतेरवर्णाशक्तिसाधकमेवेत्याशयेनाह पंकजशब्दवदिति पंकजनिकर्तृत्वपियो
गादेवोपस्थितौतत्रापिसमुदायशक्तिर्नसिध्येत् नचपद्मत्वरूपेणोपस्थितेपितत्कल्प्यतइतिवाच्यं
पदेपिसास्तुवच्यं एवंरथकारपदेपि तथाचवर्षासुरथकारोग्नीनादधीतेत्यत्रापिविनालक्षणांकृत्तयो
गेनब्राह्मणादिविषयत्वेनैवोपपत्तौ तत्कल्पनाकृतात्जातिविशेषस्याधिकारित्वंप्रकल्प्यपूर्वविचारक

भू० २ त्पुनमसयुक्तं स्यादितिभावः साधकांतरमाह वद्धूनामितिवृत्तेर्धेऽविशेषणगुणलिंग
संख्याद्ययोगादयस्तेषां वचनैः साधनेगौरवमित्यर्थः अयंभावः विशिष्टशक्त्युपस्थितौ कोरा
ज्ञः पुरुषइत्यत्रैव राजपुरुषइत्यत्रापिस्यात् विशेषणान्वयः राजपदेन स्वतंत्रोपस्थितिसंभवा
त् विभाषावचनं च समासनियमवारणाय कार्यं ननु सतिशक्तिग्रहणानामितिवचनेनैव
नाविशेषणाद्यन्वयः विभाषावचनं चकृतमेव सापेक्षासमाधत्ते वचनेरेवेति न्यायसिद्धमेवसत्रैव्य
पेक्षाविवक्षायां वाक्यस्यैकार्थीभावसमासस्येतिस्वभावत एव प्रयोगनियमसंभवात् सविशेषणेष्वपिवि
शिष्टशक्तेराज्ञः पदार्थैकदेशतया न्वयासंभवात् न्यायसिद्धमितिभावः अतएव व्यपेक्षापक्षमुपाद्य
आद्येतस्मिन्व्यपेक्षायां सामर्थ्ये सोऽसावेकार्थीभावकृतो विशेषः सवक्तव्य इति भाष्यकारेण
दूषणमप्युक्तं २२ तथाधवखदिरौ निष्कौशाम्बिर्गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालंकारो द्विदशाः
सप्तपर्ण इत्यादावितरेतरयोगाद्यन्यतमपूर्वपर्णमिश्रसंघातविकारसमुच्चयसमुदायवीप्सार्था वाचनि
कांवा चइत्यादिगौरवस्यादिति दूषणांतरमाह वकारादिनिषेधोऽथ बहुव्युत्पत्तिभंजनं कर्त्तव्यं तेन्या
स्मा० कं यसिद्धत्वसाधुतादितिस्थितिः आदिना घनश्यामः हंसगमनेत्यादावपि आदिनापूर्वोक्तानांचसंग्र
हः दूषणांतरमाह बहुव्युत्पत्तिभंजनमिति अयमाशयः चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभ
वसिद्धा नचतत्र लक्षणा प्राप्तोदको ग्राम इत्यादौ तदसंभवात् प्राप्तिकर्त्राभिन्नमुदकमित्यादिबो
धोत्तरं तत्संबंधिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्मग्राम इत्यर्थालाभात् प्राप्तेतिक्तप्रत्यय
स्यैवकर्मार्थकस्य कर्मणिलक्षणेतिचेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्ति
भंगापत्तिः प्राप्तेर्धात्वर्थतया कर्तृतासंबंधेन भेदेनोदकस्य तत्रान्वयासंभवाच्च अन्यथा देवदत्तः प
चत्येतत्सकाभिन्नप्राप्तिकर्मेतिस्यात् अन्यथासमानाधिकरणप्रातिपदिकार्थयोरभेदान्वय

च्येत इत्यत्र कर्त्तृतासंबंधेन देवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः अथोदकाभिन्नकर्त्तृकप्राप्तिरिति
बोधोत्तरं तत्संबंधिग्रामो लक्ष्यते इतिचेन्न प्राप्तेर्धात्वर्थतया कार्यकर्त्तरि विशेष्यतया असंभवात् प्रकृ
तिप्रत्ययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः प्राप्तपदे प्राप्तेर्विशेष्यत्वस्य एव नामार्थत्वेनोदकेन समम
भेदान्वयापत्तेश्च एवमूढरथः उपहृतपशुः उद्धृतोदना बद्धपाचकेत्यादावपिद्रष्टव्यं अत्र हि रथकर्मकव
हनकर्त्री पशुकर्मकोपहरणोद्देश्यः ओदनकर्मकोद्धरणावधिः बद्धपाककर्त्राधिकरणामिति बोधानु
पगमात् अतिरिक्तशक्तिपक्षेच घट रूप वविशिष्टे घटपदस्येव उदककर्तृकप्राप्तिकर्मत्वविशि
ष्टे प्राप्तोदकइत्यादिसमुदायशक्त्यैव निर्वाह इतिभावः २२ साधकांतरमाह अषष्ठ्यर्थबहुव्रीहौ
व्युत्पत्तरकल्पना क्लृप्तत्यागश्चापि तत्त्वतः किंशिन्नि नकल्प्यते अयंभावः चित्रगुरित्यादिषु चित्रगोस्वा
म्यादिप्रतीतिर्न विनाशक्तिमुपपद्यते नचतत्र लक्षणा साहि न चित्रपदे चित्रस्वामी गौरितिबोधापत्तेः ना
पिगोपदे गोस्वामी चित्र इत्यन्वयबोधापत्तेः चित्रादिमात्रस्य लक्षणायामेकदेशत्वेन तत्रगवादेरन्वयायो
गात् नच चित्राभिन्नागौरितिशक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यते इ
तिवाच्यं गोपदस्य चित्रपदस्य विनिगमनाविरहेण लक्षकत्वासंभवात् नचगोपदे साक्षात्संबंध एव
विनिगमक इतिवाच्यं एवमपिप्राप्तोदकः कृतविश्वइत्याद्य षष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेस्तो
शिकानांकृते तिकर्त्रर्थकतया साक्षात्संबंधाविशेषात् नचपदद्वये लक्षणेति नैयायिकोक्तं क
बोधापत्तिप्रसंगात् नचपरस्परतात्पर्यग्राहकत्वादेकस्यैवैकदालक्षणा न द्वयोरितिन बोधापत्ति
रितिवाच्यं एवमपि विनिगमनाविरहेण तादवस्थ्येन लक्षणायाअसंभवात् नचद्वरमपदेएवसा

श्री१२ प्रत्ययार्थान्वयानुरोधात् प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यं एवं हि बहुव्रीहिषु
सर्वत्र वापत्तेः अनेकमन्यपदार्थ इत्यनेनानेकसुबन्तानामन्यपदार्थं प्रति प्राधान्येन तद्विधानात् किंत्वेवं स
ति घटादिपदेष्वपि चरमवर्णस्यैव वाचकताकल्पनास्यात् कॢप्तस्यान्यथाकल्पने त्यागः पूर्वपूर्ववर्णानां तात्प
र्यग्राहकत्वेनोपयोगसंभवात् एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेत् प्रकृत्यादिकत्वेन विशिष्टस्यैव तत्र
वाचकत्वानुशासनात् अथ प्रकृतिलाश्रये विभक्त्यर्थान्वय इत्येवं कल्प्यत इति चेन्न दण्डे जमानय
इति नं पश्य शूलिनं पूजयेत्यादौ पंकदंतशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसंगात् अथ स्वमानयेत्य
त्र घटे एवानयनान्वयापत्तेश्च न च दंडादीनां विशेषणतया न तत्रानयनाद्यन्वयः पाकी भीतः धर्मात्
सुखीत्यादौ पाकधर्मादिजन्यतायाः रूपसुखादावनन्वयप्रसंगात् यत्र प्रकृत्यर्थे तज्जन्यत्वं तद्विषयत्व
मात्रं तथात्राविरुद्धमिति तन्न घटं पश्येत्यत्र घटपदात् समवायेनोपस्थिताकाशवारणाय इत्थं प्रकृत्यर्था
न्वयस्यावश्यकत्वात् अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थिति विशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न गामानय
ति कृष्णां दंडेनेत्यत्र कृष्णत्व तृतीयार्थान्वयप्रसंगात् अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासो
त्तरविभक्तेः कल्प्यत इति चेन्न अकॢप्तकल्पना कॢप्तव्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव
युक्तत्वादिति दिक् अपि च समासे विशिष्टशक्ति स्वीकारे राजपुरुषश्चित्रगुः नीलोत्पलमित्यादौ स
र्वत्रानन्वयप्रसंगः राजपदादेः संबंधिनि लक्षणायामपि तंडुलं पचतीत्यादौ कर्मत्वादिसंसर्गेण तंडुलादेः
पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात् पुरु
षादेस्तथात्वाभावात् तंडुलः शुक्ल इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तंडुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः
शुक्लेन तंडुले इत्यादौ च विशेषणविभक्तिरभेदार्थापादिकैवान्वयः इति नातिप्रसंगः तथा च समासे प
रस्परमन्वयासंभवादावश्यकेव समुदायस्य तादृशविशिष्टार्थशक्तिः किंच राजपुरुष इत्यादेः संबंधिनि स

पत्तिरिति चेदप्यापूदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः एवं च अषष्ठ्यर्थे बहुव्रीहौ
व्युत्पत्त्यंतरकल्पना उक्तयुक्त्या समासे शक्त्यंतरकल्पना कॢप्तत्यागः कॢप्तशक्त्योपपत्तिरिति व्युत्पत्तिः
त्त्यागश्च तवास्ति तर्हि सर्वत्र समासशक्तिं न कल्पयेदिति वाच्यार्थः यत्तु व्यपेक्षावादिनो नैय्यायिकमीमां
सकादयः न समासे शक्तिः राजपुरुष इत्यादौ राजपदादेः संबंधिलक्षणयैव राजसंबंध्यभिन्नः पुरुष इ
ति बोधोपपत्तेः अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादि विशेषणान्वयः न वा धनस्याभो नि
र्व्यकाशांबिर्गोरथ इत्यादाविव आदिप्रयोगापत्तिः उक्तार्थतया द्वन्द्वक्रोतादिपदप्रयोगासंभवात् न वा
विभाषेति सूत्रावश्यकत्वं लक्षणया राजसंबंध्यभिन्न इति बोधयिषायां समासस्य राजसंबंधवानि
ति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसंभवात् नापि पंकजपदप्रतिबंधदीशक्तिसाधिका तत्रा
वयवशक्तिमजानतोऽपि बोधात् न च शक्तिग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः संभवति अत एव
राजादिपदशक्तिग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः नापि चित्रगुरित्यादौ लक्षणासंभवे ष्यष
ष्ठ्यर्थबहुव्रीहौ लक्षणाया असंभवः बहुव्युत्पत्तिभंजनापत्तेरिति वाच्यं प्राणोदकप्रसुदकपदे एव
लक्षणास्वीकारात् पूर्वपदस्य योगिकत्वेन तल्लक्षणाया धातुप्रत्यय तदर्थज्ञानसाध्यतया विलंबित
त्वात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च घटादिपदे च अतिरिक्तशक्ति
कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव संकेतितत्वात् बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् प्र
त्येकं वा संनिधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यत इति विशेषः स्वीकृता

भ.२२ नघटादिपदेष्वपि चरमवर्णस्यैववाचकत्वं मीमांसकमान्येरित्याहुः अत्रोच्यते समासशक्तेरस्वीकारे
तस्य प्रातिपदिकसंज्ञा न स्यात् अर्थवत्त्वाभावेनार्थवदधातुरप्रत्ययः प्रातिपदिकमित्यस्याप्रवृत्तेः नच
कृत्तद्धितसमासाश्चेत्यत्र समासग्रहणात् सा तस्य नियमार्थतायो भाष्यसिद्धत्वाद्वैयाकरणभूषणे समासप्रति
पादितत्वात् समासवाक्ये शक्त्यभावेन शक्यसंबंधरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्य
संभवात् यतिप्रसक्तिर्न इत्यारभ्य स्यान्स्यबिति प्रत्याहारो भाष्यसिद्धः तस्मादप्राप्तिप्रातिपदिकमि
त्येवसूत्रांतं कृतमर्थवदादिसूत्रद्वयेन समासग्रहणं च नियमार्थमस्तु तथा च अतिव्याप्तिवारणं प्रातिप
दिकमित्यर्थात् समासस्यापि सा स्यादिति चेत् तथापि प्रत्येकं वर्णेभ्यः संज्ञावारणाय अर्थवत्त्वावश्यकत्वेन समा
सार्थाप्ततादवस्थ्यमेव तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति ध्वनयद्देवकिं
किंचैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः
विशिष्टोत्तरमेव प्रत्ययोत्पत्ते विशिष्टस्यैव प्रकृतित्वात् यत्तु संनिहितपदार्थगत स्वार्थबोधकत्व
व्युत्पत्तिरेव कल्प्यत इति तन्न उपकुंभं अर्धपिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यत्तिचारा
त् नचतत्रापि संनिधानमेव आनुशासनिक संनिधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यानुशिष्ट
सा तदर्थगतं स्वार्थं बोधयति समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यं अर्थवत्सू
त्रेणाविशिष्ट

इत उत्तर ग्रंथ द्वादशोत्तरपृष्ठे चतुर्थपंक्तौ उपरि द्रष्टव्यः

अवेदत ५

वंधेवा लक्षणा नाद्यः राज्ञः पुरुष इति विवरणाविरोधात् समाससमानार्थकवाक्यस्यैव विग्रहत्वात् अन्य
था तस्मात् शक्तिनिर्णयो न स्यात् नान्त्यः राजसंबंधिरूपः पुरुष इति बोधप्रसंगात् विरुद्धविभक्तिरहितप्रा
तिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपंचितं वैयाकरणभूषणे अत एव वषट्कर्तुः प्रथमभक्ष इत्यत्र
भक्षमुद्दिश्य प्राथम्यविधाने यत्नं एकप्रसरत्वभंगापत्तेरिति तृतीये अग्नेः स्विष्टकृतं यजति घृतयाजानुवादे
न नत्रित्वविधाने युक्तं एकप्रसरत्वभंगापत्तेरिति दशमे च निरूपितं संगच्छते संगच्छते चारुणाधिकरणार
म्भः अन्यथा अरुणया एकहायन्या पिंगाक्ष्या सोमं क्रीणातीत्यत्रारुणपदवदितरयोरपि एकत्वादिगु
णमात्रवाचकतया अमूर्ततया क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेद इत्याशंका
या असंभवादिति प्रपंचितं भूषणे तस्मात् समासशक्तिपक्षो जैमिनीयैरवश्यमभ्युपेय इत्यास्तां
विस्तरः ३२ राजपुरुष इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः चित्रगुरित्यादौ च चित्राणां गवां स्वाम
य इत्येव समानार्थकत्वानुरोधात् यद्यपि प्रथमांतानामेव बहुव्रीहिरिति सूत्राल्लभ्यते इति प्रथमां
तपक्षे वाक्यं चित्रा गावो यस्येत्येव संभवत्यनेकमन्यपदार्थे इति समासविधानात् राज्ञः पुरुष इति च पक्षे वाक्यं त
थापि तस्य न विग्रहत्वं भिन्नार्थत्वात् किंतु न कस्यैवेति मीमांसकानां प्रसंगो निरस्यति आख्याततत
द्धितकृतो यत्किंचिदुपदर्शक गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः तद्धितकृतो यत्किंचिदर्थ
बोधकं विवरणमाख्याते तत्र विपर्ययो दृष्टः तथा हि आक्षिकः कुंभकार इत्यत्राक्षैः करणैर्दी
व्यति कुंभानुकूलव्यापाराश्रय इति बोधः अक्षैर्दीव्यति कुंभं करोतीत्यत्राक्षकरणिका देवनानु
कूला भावना कुंभाश्रया अनुकूला भावनेति बोधः कृत्प्रत्यये कारकाणामाख्याते भावनायाः प्राधा
न्यवदतो मीमांसकस्यापीति गुणप्रधानभावाव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य

भू.२ क्रियाभावोयस्येत्यादेर्विग्रहस्यैवबाधकमस्तीतिभावः ३४ नन्वस्तु कैरीत्यासर्वत्रसमासेशक्तिरस्तु
तथाविग्रहस्थापिषष्ठीतत्पुरुषकर्मधारयोः शक्तिमत्वाविशेषान्निषादस्थपत्यधिकरणत्वासि
द्धान्तसिद्धिर्नस्यादित्यतआह पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणावस्थिते शक्तिग्रहेतत्संगतबहिरं
गत्वचिंतनं पर्यवस्यच्चासौशाब्दबोधश्चतस्मादविदूरस्थश्चासौप्राक्क्षणश्चतदानीतनंलाघवमादा
याधिकरणाविरोधइत्यर्थः अयंभावः निषादस्थपतिपदेसमासशक्तिपक्षेनिषादरूपेनिषाद
नांस्थपतौनिषादस्वामिकेपुरुषेवातौचेसर्वत्रशक्तत्वाज्ञानाधिः तथाचमानर्थितासत्यांविशेषा
वगतिरितिन्यायेनतत्कल्पनायांपदद्वयेनपूर्वोपस्थितत्वादेवोपस्थितत्वादिलाघवात्तत्कल्पनेतइतिप
रेषामपिसत्तितासत्यंयष्टीःप्रवेशयेतिवल्लक्षणायाःदुर्वारत्वात्तात्पर्यमेवकल्पकोटावशिष्यत
इतिदिक् ३५३ इतिवैयाकरणसमयशक्तिनिरूपणंसमाप्तं शक्तिप्रसंगात्तस्याःस्वरूपमाह
इंद्रियाणांस्वविषयेष्वनादिर्योग्यतायथा अनादिरर्थैःशब्दानांसंबंधोयोग्यतातथा
इंद्रियाणांचक्षुरादीनांस्वविषयेषुचाक्षुषेषुघटादिषुयथानादिर्योग्यतातदीयचाक्षुषादिका
रणता तथाशब्दानामपि अर्थैःसहतद्बोधकारणतैवयोग्यतासैवशक्तिरित्यर्थः ननुबोधकारणत्व
मनादिमतंशक्तिः आधुनिकेदेवदत्तादिपदेतदभावात् अन्यथापित्रादिसंकेतज्ञानेप्यन्वयबोधप्रसंगः ला
क्षणिकातिव्याप्तिश्चेतिसंकेतज्ञानमपिहेतुर्वाच्यं तथाचावश्यकत्वात्सएवशक्तिरस्तु सचाधुनिकेपित्रादेर्गवा
दौचेश्वरस्येतिचेत् अत्रोच्यते संकेतोनस्वरूपेणहेतुः अगृहीतशक्तिकादर्थबोधप्रसंगात् नापिसामान्य
तोज्ञातः प्रमेयत्वादिना तज्ज्ञानेपिबोधप्रसंगात् नापिसंकेतत्वेन तज्ज्ञानंतु गवादिपदेष्वीश्वरादेःसंकेतत्वे

जनकतावच्छेदकत्वेनतज्ज्ञानंहेतुःततोपिलाघवेनार्थधी

नानाज्ञानशून्यानांलौकिकमीमांसकादीनांतात्पर्यबोधजनकत्वग्रहवतामेवबोधेनव्यभिचारात् नचार्थधीज
नकेतिनैवमिति हेतुतायामस्मत्पक्षासिद्धेः नचआधुनिकदेवदत्तादौसंकेतज्ञानादेवबोधेनव्यभिचारःतत्रा
पीदंपदमेनमर्थंबोधयत्वितीच्छाग्रहेपदेतदर्थबोधकत्वस्यावगाहनेनव्यभिचाराभावात् नचस्वातंत्र्येण
बोधकताज्ञानंकारणंवाच्यं अन्यथा नेदंतद्धीजनकमितिज्ञानेतोस्मात्बाद्यमर्थोबुद्धेनेतिज्ञानसंग्रह
पत्तिरितिवाच्यं नेदंतद्धीजनकमितिग्रहवताबाधेनपदेपरग्रहंजानतातद्ग्रहसंभवात् अन्यथाभ्रांतिज्ञस्या
पिभ्रांतत्वापत्तेरितिइदंचार्थधीजनकत्वंपित्रादिसंकेतज्ञानाद्गृह्यते अतस्तज्ज्ञानात्सर्वेनबोधः नापिलाक्ष
णिकेतिव्याप्तिरिष्टत्वात् शक्तिग्राहकव्यवहारस्यमुख्यलाक्षण्यसाधारण्यात् किंचप्रत्यक्षादिजन्योपस्थि
तेःशाब्दबोधानंगत्वात् शाब्दबोधंप्रतिशक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्चकारणत्वंवाच्यं तथाच
कारणकार्यभावद्वयकल्पनेगौरवंस्यात् अस्माकंपुनःशक्तिजन्योपस्थितित्वेनैवहेतुतेतिलाघवं अपि
चलक्षणावृत्तिस्वीकारेकार्यकारणभावस्यप्रत्येकंव्यभिचारः शक्तिजन्योपस्थितिंविनापिलक्षणाजन्यो
पस्थितितःशाब्दबोधात् नचाव्यवहितोत्तरत्वसंबंधेनतत्तदुपस्थितिमत्वंकार्यतावच्छेदकंतत्तदुपस्थि
तित्वंचकारणतावच्छेदकं अनंतकार्यकारणभावप्रसंगात् किंचपदार्थोपस्थितिंप्रतिपिशक्तिज्ञानत्वेन
लक्षणाज्ञानत्वेनहेतुतेतिव्यभिचारोगौरवंचप्राग्वदेवद्रष्टव्यं नचेदंपदमेतदर्थबोधकमितिशक्तिज्ञान
कार्यकारणभावकल्पनेपिपदतदर्थकृतसंकेतनानेककार्यकारणभावकल्पनेगौरवंतवापिसमं परस्पर
व्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वेचसुतरामितिवाच्यं शक्तिभ्रमानुरोधेनतत्तत्पदतत्तदर्थ

२१५ भेदेनकार्यकारणभावानेसस्पतवापि साम्पाल्लक्षणा कार्यकारणभावकल्पनागौरवंपर्वतवातिरिच्यते अंशतु
निजन्योपस्थितिनैव शाब्दबोधहेतुता शक्तिज्ञानत्वेन चपदार्थोपस्थितिं कारणतेत्येवमभ्यावान्यमितिचे
त्र शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थितिसनुकूलपदपदार्थसंबधत्वस्य वा हेतुनिष्ठकारणताप्रकार
पातानवच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवात् शाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितित्तरज्ञाने
तद्घटितकार्यकारणभावग्रहस्यासंभवात् अथममापि शक्तिज्ञानत्वेनत्वेनैव हेतुता शक्यसंबंध
रूपलक्षणायां शक्तेरप्रविवेशादितिचेन्न शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्व
स्यावश्यकत्वात् अन्यथा गंगातीरयोः संबंधाग्रहवतो गंगापदशक्तिज्ञानतोपि गंगायां घोषइतिवाक्या
त्तीरबोधप्रसंगः शक्तिज्ञानस्य हेतोः सत्वात् अपिच घटमानयेतिवाक्यं हस्तिनं चस्मरतो घटपदादिव बोध
टादेः गजादिस्तिपकस्यच समूहालंबनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः समूहा
लंबनरूपायां पदार्थोपस्थितौ एत्तिजन्यत्व सत्वात् तथा च विषयतया शाब्दबोधं प्रति तद्विशविषयकवृत्ति
जन्योपस्थितिर्हेतुरितिवाच्यं एवं च लक्षणाज्ञानस्यापि शक्तिज्ञानत्वेन हेतुत्वेम संभवद्युक्तिकमिति एतेन श
क्तिज्ञानप्रयोज्योपस्थितिनलक्षणाज्ञानकार्यकारणभावांतरममापीतिपरास्तं ग्रंथे अपतस्यानतिप्रसक्त
स्य दुर्वचत्वाच्चेसादिविस्तरेण प्रपंचितं भूषणे ३८ नन्वेवं भाषादितो बोधदर्शनाद्बोधकतारूपाशक्तिस्तत्रा
पिस्या तथा च साधुतापि स्यात् शक्तत्वस्यैव साधुतापावाकरणाधिकरणप्रतिपादनादित्यत आह द्वि
धासमाधत्ते असाधुरनुमानेन वाचकः कैश्चिदिष्यते वाचकत्वाविशेषेवा नियमः पुण्यपापयोः असाधुः
गाव्यादिः अनुमानेन साधुशब्दमनुमाप्य वाचकः बोधकः कैश्चिदिष्यते तथा च लिपिवत्तेषां साधुस्मरण
एवोपयोगो न तु साक्षात् तद्वाचकत्वमतो नसाधुत्वमितिभावः उक्तं हि वाक्यपदीये ते साधुष्वनुमानेन प्रत्य

योत्पत्तिहेतवः तादात्म्यमुपगम्येव शब्दार्थस्यप्रकाशकाः अशिष्टैरनुगम्यंते पर्यायाइवसाधवः नयतः स्म
तिशास्त्रेण तस्मात्साक्षादवाचकाः अंबांबेतियदाबालः शिक्ष्यमाणः प्रभाषते अव्यक्तं तद्विदां तेन व्यक्तेभव
तिनिर्णयः एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोभिधीयते इति ननु पाम
राणां साक्षादवाचकत्वे किं मानं शक्तिकल्पक व्यवहारादेस्तुल्यत्वादितिचेत्सत्यं तत्तद्देशभेदेनानंतत्वेष्व
नंतेषु तेषु शक्तिकल्पने गौरवात् न च पर्यायत्वात्प्रतीतिः शंक्या तेषां सर्वदेशैकत्वाद्विनिगमनाविरहेणाहि
सर्वत्र शक्तिकल्पना न ह्यपभ्रंशे तथा अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च एवं च शक्तत्वमेवा
स्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतं तन्मते नैव द्रष्टव्यं इदानीं स्वमतमाह वाचकत्वाविशेषेनेति
अयं भावः अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् न च साधुस्मरणात्ततो बोधः तानविदुषां पामरा
णामपि बोधात् तेषां साधोरबोधाच्च न च शक्तिभ्रमात्तेभ्यो बोधः बोधकत्वस्याबाधेन तद्ग्रहस्यापि
भ्रमत्वात् ईश्वरेच्छा शक्तिरिति मतेपि सन्मात्रविषयिण्यास्तस्या बाधाभावात् शक्तेः पदार्थपदविशेषघ
टितायाभ्रमासंभवाच्चेति उक्तं च वाक्यपदीये पारंपर्यादपभ्रंशा विगुणेष्वभिधातृषु प्रसिद्धिमागता येन ते
षांसाधुरवाचकः दैवीवाग्व्यवकीर्णेयमशक्तैरभिधातृभिः अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययइति अ
वाचकः अबोधकः बुद्धिविपर्ययः एत एव वाचका नान्ये इति विपर्ययइत्यर्थः किंच विनिगमनाविरहाद्भाषा
णामपि शक्तिः न च तासां नानात्वं दोषः संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहा
द्दवस्थ्यात् किंचानुपूर्वीपदे वेदादिका सा च पर्यायेष्विव भाषायामप्यन्यायैवेति कत्वस्यैव विशेषइतिविशा
वस्मृतिः तथा च संस्कृतवद्भाषाशब्दाः शक्ता एव न च पर्यायतया भाषाणां गणनापत्तिः साधूनामेव
कोशादौ विभागाभिधानात् पापजननबोधनेनासाधूनितिनिषेधः तथा च पुण्यजननयोग्यत्वं साधुत्व

भू. १६ पापत्वजनकयोग्यत्वमसाधुत्वं तत्र ज्ञानकृतावच्छेदिका च जातिः तज्ज्ञापकं च कोशादिव्याकरणादि च
एवमेकत्र राजसूयादौ ब्राह्मणे फलाजनकत्ववत् गवादिशब्दानां ज्ञापकं च श्वादौ साधुत्वमिति संग
च्छते आधुनिकदेवदत्तादिनाम्नामपि अक्षरमित्यादिभाष्येण व्युत्पादितत्वात्साधुत्वं एवं च यश
ब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति पर्यवसितं गौणानां व्युत्पादनानुसा
रेण प्रवृत्तौ साधुत्वमेव आधुनिकलाक्षणिकानां च साधुत्वमिष्टमेव अत एव ब्राह्मणाय दद्यात्
सर्पे ब्राह्मणं दद्यादित्यादिकं लक्षणायामसाधुरित्यादि विस्तरेण प्रपञ्चितं भूषणे ३७ अतिरिक्ते श
क्तेर्ग्रहोपायमाह संबंधशब्दे संबंधो योग्यता प्रतियोग्यता समया योग्यता सैव मातापित्रादि
योग्यवत् संबंधो विषयः योग्यता प्रतियोग्यता शब्दप्रतियोग्यता विषयः इति समयाद्व्यवहारा
त् योग्यता संवित् शक्तिग्रहः घटपदमत्र योग्यं एतत्संबंधीति व्यवहारात् अर्हे ग्रासर्पः ३८ इति
वैयाकरणभूषणे शक्तिनिर्णयः नञर्थमाह नञ्समासे चापरस्य प्राधान्यात्सर्वनाम
ता आरोपितत्वं नञो द्योत्यं सोऽप्यतिसर्ववत् नञ्समासे अपर उत्तरपदार्थस्य प्राधा
न्यात्सर्वनामता सिध्यतीति शेषः अत एव आरोपितत्वमेव नञ्द्योत्यं स च पूर्वपदमिति शेषः
अयं भावः असर्व इत्यादावारोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता
सिध्यति अन्यथातिसर्व इत्यत्रेव सा न स्यात् घटो नास्तीत्यादौ अभावविषयकबोधे तस्य वि
शेष्यताया एव दर्शनात् अस्मदीयाच्च स आर्थो बोधो मानसस्तथा च असर्वस्मै इत्याद्यसिद्धि
प्रसंग इति अत्र चारोपितत्वमारोपविषयत्वं आरोपमात्रमर्थो विषयत्वं संसर्ग इति निष्कर्षः
द्योतकत्वोक्तेर्निपातानां द्योतकत्वमभिप्रेत्य ३८ घटो नास्ति अब्राह्मण इत्यादौ आरोप बो

धस्य सर्वानुभवविरुद्धत्वात्सिद्धान्तरमाह अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् विशेषणं विशेष्यो वा न्याय
तस्त्ववधार्यताम् तदर्थः नञर्थः अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय भाष्यस्येति तथा च
नञ्सूत्रे महाभाष्यं निवृत्तपदार्थक इति निवृत्तपदार्थो यस्य नपुंसके भावे क्तः इति क्तः अभावार्थक इत्यर्थः य
त्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः सादृश्यादिना अध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति
कैय्यटेनोक्तं तन्न आरोपितब्राह्मणस्य क्षत्रियादेर्नञ्वाच्यत्वात् अन्यथा सादृश्यादेरपि वाच्यतापत्तेः यत्तु
तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः इति पठितो अ
ब्राह्मणः अपापं अनश्वः अनुदरा कन्या अपशवो वा अन्ये गोऽश्वेभ्यः अधर्म इत्युदाहरन्ति तत्तु आर्थि
कार्थमभिप्रेत्य तस्य चान्यत्र विशेषणमिति अब्राह्मण अभावप्रतियोगी ब्राह्मणः प्रतियोगिनीति शेषः
तथा च असर्वपदे सर्वनामसंज्ञा अनेकमन्यपदार्थे संख्याते नेकया संज्ञायां गयेत्यादिविकशब्दार्थप्रा
धान्यादेकवचननियमः अब्राह्मण इत्यादौ उत्तरपदार्थप्राधान्यात्तत्पुरुषत्वं अत एव भवसि अनेकभवा
मीत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते अन्यथा तदभावो मदभाव इति तदभावांशे युष्मदस्मदोर
न्वयेन युष्मत्सामानाधिकरण्यस्य तिष्ठतस्तात्पुरुषव्यवस्था न स्यात् अस्मन्मते च भेदप्रति
योगि तदभिन्नाश्रयिक भवनक्रिया ×६+ येसन्वेया सामानाधिकरण्यं नानुपपन्नं इति भावः वि
शेष्यो वेति प्रतियोगिनीति शेषः अयं भावः गौणत्वेऽपि नञ्समासे एतत्तदोः सुलोपोऽकोरनञ्समासे
हलीति ज्ञापकात्सर्वनामसंज्ञानानुपपन्ना असः शिवः इत्यत्र सुलोपवारणाय नञ्समासे इ
ति हि विशेषणं न च तत्र तच्छब्दस्य सर्वनामतास्ति गौणत्वात् अकोरित्यके साहितव्याप्तेरसा स
र्वनाम्नोरेव तत्र ग्रहणलाभात् तथा च अनञ्समास इति ज्ञापकं सुवचं अनेकमन्यपदार्थे इत्य

भ.७ दावेकवचनं च विशेष्यानुरोधात् कृवामंत्रिते पराङ्गवत्स्वरे इसतोनुवर्तमानं सप्रग्रहणं विशेष्यमेकवचनांतमेव
किंच अनेकशब्दाहृवचनोपादाने बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्नास्त्येव दिक्षु पसंग्रहापेक्षव
चनं जात्यभिप्रायमौत्सर्गिकं वा सेव्यते नेक्ष्यसत्रापि योक्ष्यते इति विशेष्यानुरोधात् प्रत्येकं सेवनान्वयबो
धनाय चैकवचनं न तु तत्र पदार्थप्राधान्यप्रयुक्तं अत एव पततु सनेके जलधेरिवोर्मयः पूर्णिमादिकमपि सूपप
दं अतंभवसीत्यादौ युष्मदस्त द्विन्नेलक्षणा नञ् द्योतकः तथा चाभिन्नेन युष्मदर्थेन तिङः सामानाधि
करण्यात् पुरुषव्यवस्थोपपद्भिन्ना भिन्नाश्रयिका भवनक्रियेति शाब्दबोधः एवं तं न पचसीत्यत्र तद्भिन्ना
श्रयकपाकानुकूलभावनाभावः घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्थिताभावः इति विशेषबोधः
असमस्तनञः क्रियायामेवान्वयात् सत्त्वाभावो सत्ताभाव [illegible] न्याभाववादिरूपेणाशक्यः
तत्तद्रूपेणाबोधादित्याद्यन्यत्र विस्तरः इति वैय्याकरण० नञर्थनिर्णयः प्रादयो द्योतकाश्चादयो वा
चका इति नैय्यायिकमतमयुक्तं वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयति
द्योतकाः प्रादयो येन निपाताश्चादयस्तथा उपास्यते हरिर्हरो लकारो दृश्यते यथा येन हेतुना
प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः अयं भावः ईश्वरमनुभवती
त्यादावनुभवादिः प्रतीयमानो न धात्वर्थः भवतीत्यत्रापत्तेः नोपसर्गार्थः तथा सत्यप्रकृत्यर्थतया
तत्राख्यातार्थेनान्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः अनुगच्छतीत्यादौ अनु
भवादिप्रत्ययापत्तेश्च न विशिष्टार्थे गौरवात् तथा च धातोरेव विधमानत्वादि वाचकत्वात् लक्षणा
उपसर्गस्तात्पर्यग्राहक इत्यस्तु तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति नञ्चादिष्वपि तत्त्वं
चैत्रमिव दृश्यतीत्यादौ सादृश्यविशिष्टचैत्रपदलक्ष्यपदं वशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति
७। स्वयंयुक्त्यंतरमाह उपास्यते इत्यत्र हि उपासना किमुपसर्गार्थः विशिष्टस्य धातुमात्रस्य वा

नाद्यः तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्य आसधातौ उपासनारूपफलवाचकत्वाभावा
दनापत्तेस्ततः कर्मणि लकारो न स्यात् न द्वितीयः गौरवात् ततः परिशेषागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति भा
वः दृश्यते इत्यत्र कर्मणीति शेषः ४८ नञ्चादिष्वपि तुल्यमित्याह तथान्यत्र निपातेपि लकारः कर्मवाचकः विशेषणा
द्ययोगेपि प्रादिवच्चादिकेष्वसन् अन्यत्र साक्षात् क्रियते अलंक्रियते ऊरीक्रियते शिव इत्यादौ अत्रापि धातोस्तत्त
दर्थे कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यं इत्युपसर्गवद्द्योतकत्वममीषामपीत्यर्थः यद्यपि कृधातोः
सकर्मकत्वमस्त्येव तथाप्येष्वर्थेषु सकर्मकता न स्यात् अन्यथा वायुर्विकुरुते सैंधवा विकुर्वत इत्यत्रापि स्या
दिति भावः अथोपासनासाक्षात्क्रियादि निपातोपसर्गौ साक्षादसाक्षात्तुल्ययोरिति [illegible] स्वरसात् तदनुकू
लो व्यापार एव च धात्वर्थस्तु स्वस्वप्रयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सु
वचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति न दृष्टान्तसाधकमिति चेन्न नामार्थधात्वर्थयोर्भेदेन साक्षादन्वया
संभवात् निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात् अन्यथा तंडुलः पचतीत्यत्रापि कर्मत्वात् तंडुलानां धा
त्वर्थेन्वयापत्तेरिति किंच प्रादीनां वाचकत्वे स्यात् प्रकर्षः कीदृशो निश्चये इति वक्तुं यान् प्रकीदृशो निरित्यपि स्या
त् अस्मन्मते प्रादेरनर्थकत्वात् तदन्वय इसत एव घातकतातेषां स्यादिति सूचयन्नाह विशेष
णेति शोभनः समुच्चयो प्रदृश्य इति वक्तोभन इत्यस्याप्यापत्तेस्तस्य समाधेयत्वादिति भावः अपि च निपा
तानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासंभवः अन्यथा राजा पुरुष इत्यत्राप्यापत्तेरित
अभिप्रेत्याह आदीति धवखदिरयोः समुच्चय इतिवद्धवस्य खदिरस्य चेत्येव स्यादिति भावः ४९ ननु प्रातिपदि
कार्थयोर्भेदेनान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्त
दोष इत्याशंक्याह पदार्थः सदृशान्वेति विभागेन कदापि न निपातेनातरं संकोचे प्रमाणाभावे विभावयं

भू.८ सदृशेनसमानाधिकरणेनेतियावत् अन्वेतिअभेदेविशेषः विभागेनासदृशेन असमानाधिकर
णेनेतियावत् अयमर्थः समानाधिकरणप्रातिपदिकार्थयोःअभेदान्वयव्युत्पत्तिर्निपातातिरिक्तवि
षयेतिकल्पनेमानाभावात् गौरवंच अस्माकंनिपातानांद्योतकत्वेनकलादन्वयएवनास्तीतिनायंदोषः
अतएवघटोनास्तीत्यादौघटपदंतद्धतियौगिकेलाक्षणिकमितिनैय्यायिकाः ४३ अपिचनिपाता
नांवाचकत्वेकाव्यादौअन्वयोनस्यादितिसाधकांतरमाह शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव इ
त्यादावन्वयोनस्यात् सुपांचश्रवणं ततः अत्रउस्रसदृशैःशरैरसदृशानुदीच्यानुद्धरिष्यन् इत्यर्थःअ
यंचोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्यद्योतकत्वेसंगच्छते अन्यथा प्रत्ययानांप्रकृत्यर्थान्वित
स्वार्थबोधकत्वव्युत्पत्तिविरोधः तथाहि उस्रैरितिकरणतृतीया नचोस्रैरकर्णाइवार्थसदृशस्यक
रणत्वेपितस्यकरणत्वंनानेनबोधयितुंशक्यं अप्रकृत्यर्थत्वात् इवशब्दस्यसमासस्वार्थकत्वादुत्त
रंतृतीयासंभवात् समवेवाश्रवणप्रसंगात् उस्रपदोत्तरतृतीयानन्वयप्रसंगाच्चेत्याह सुपांचेति
सुपाश्रवणंचेत्यर्थः चकाराद्उस्रपदोत्तरतृतीयानन्वयःसमुच्चीयते इत्यादावित्यादिपदाद्वागर्थौ
विवसंपृक्तौपार्वतीपरमेश्वरौवंदे इत्यत्र वागर्थयोर्वैदिकर्मत्वाभावात् नद्युत्तरद्वितीयाअनन्वय
इवार्थस्यकर्मत्वबोधकासंभवश्चसंगृह्यते यदिचविशेषणविभक्तिरभेदार्था साधुत्वमात्रा
र्थावा तदापिइवशब्दस्यवाचकत्वेनन्वयएव उस्रसदृशशराणांसमानाधिकरणेपदोपस्थाप्य
त्वाभेदेनान्वयायोगात् बाधादभेदेनापिनसः नद्युस्राभिन्नसदृशाभिन्नाःशराइत्यर्थोद्रष्टव्यः
५४ ननुत्वन्मतेब्राह्मणइत्यादौतत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनउत्तरपदार्थ
प्राधान्याभावात् उपसर्गस्यार्थवत्ताभावेनप्रातिपदिकत्वाभावेनप्रातिपदिकत्वाभावाद्विभक्ति